पतञ्चिका ७। इति शब्दरत्नावली ॥ गया ८ वाणासनः ९ इज्या १० । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । २२६ । २० ।
"जग्राह बलमास्थाय ज्यया च युयुजे धनुः ॥")
माता । वसुधा । इति मेदिनी । ये, २ ॥

ज्यानिः, स्त्री, (ज्या + "वीज्याज्वरिभ्यो निः ।" उणां ४ । ४८। इति निः ।) जीर्णता । हानिः । तटिनी । इति शब्दरत्नावली ॥

ज्यायान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य + ईयसुन् ज्यादेशश्च ततो "ज्यादादीयसः ।" ६।४।१६०। इत्यात्वम् ।) वृद्धतमः । तत्पर्य्यायः । वर्षीयान् २ दशमी ३ प्रशस्यः ४ । इत्यमरः । २ । ६ । ४३ ॥ अतिवृद्धः ५ दशमीस्थः ६ । इति जटाधरः ॥ (यथा, मनुः ।३।१३७ । [पिता ॥")
"ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रियः

ज्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) ङ, ज्यवते । इति दुर्गादासः ॥

ज्युत, इर् दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) इर्, अज्युतत् अज्योतीत् जुज्योत । इति दुर्गादासः ॥

ज्युत, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) अन्तःस्थादियुक्तः । ऋ, अजुज्योतत् । ङ, ज्योतते चन्द्रः । इति दुर्गादासः ॥

ज्येष्ठः, त्रि, (अयमेषामतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य + इष्ठन् ततो ज्यादेशः ।) अतिवृद्धः । श्रेष्ठः । (यथा, महाभारते । १३ । १४३ । ७ ।
"ज्येष्ठं वर्णमनुप्राप्य तस्मादर्च्चेत वै द्विजः ॥"
ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् इति ज्यैष्ठी सा अस्मिन् मासीति पुनरण् संज्ञापूर्व्वस्य विधेरनित्यत्वान्न वृद्धिः ।) ज्येष्ठमासि, पुं । इति मेदिनी । ठे, ५ ॥ अग्रजः । (यथा, रघुः । १२ । १९ ।
"दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ॥")
अधिकवयाः । इति भरतः ॥

ज्येष्ठतातः, पुं, (तातस्य पितुर्ज्येष्ठः । राजदन्तादित्वात् पूर्व्वनिपाते साधुः ।) पितुरग्रजः । इति शब्दरत्नावली ॥ ज्येठा इति भाषा ॥

ज्येष्ठवर्णः, पुं; (वर्णानां ज्येष्ठः श्रेष्ठः निर्द्धारणे तु वर्णेषु ज्येष्ठः । पूर्व्वनिपातः ।) ब्राह्मणः । इति शब्दरत्नावली ॥

ज्येष्ठबला, स्त्री, (ज्येष्ठाख्या बला ।) सहदेवी । इति राजनिर्घण्टः ॥

ज्येष्ठश्वश्रूः, स्त्री, (ज्येष्ठा पूज्या श्वश्रूरिव संज्ञात्वात् पुंवद्भावः ।) पत्न्या ज्येष्ठभगिनी । बड़शाली इति भाषा । तत्पर्य्यायः । कुली २ । इति हेमचन्द्रः ॥

ज्येष्ठसाम, [न्] क्ली, (ज्येष्ठं साम इति नित्यकर्म्मधारयः ।) सामभेदः । तदध्ययनाङ्गव्रतम् । इति मिताक्षरा ॥ (यथा, महाभारते ।१२।३४८।४६।
"ज्येष्ठं नाम्नाभिविख्यातं ज्येष्ठसामव्रतो हरिः ॥")

ज्येष्ठा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टादशनक्षत्रम् । सा तु शूकरदन्ताकृतितारकत्रितयात्मिका । इति कालिदासः ॥ वलयाकृतिः । अस्या देवता इन्द्रः मिश्रगुणः । इति दीपिका ॥ अत्र जातस्य फलम् ।

"सत्कीर्त्तिपुत्त्रैर्विविधैः समेतो
वित्तान्वितोऽत्यन्तलसत्प्रतापः
श्रेष्ठप्रतिष्ठो विकलस्वभावो
ज्येष्ठा भवेद्यस्य च जन्मकाले ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

(यथा, मार्कण्डेयपुराणे । ३४ । १३ ।
"कुर्व्वन्तश्चानुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यमुत्तमम् ॥")
गृहगोधिका । इति मेदिनी । ठे, ५ ॥ मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ गङ्गा । इति राजनिर्घण्टः ॥ धीरादिनायिकाभेदः । तस्या लक्षणं यथा । परिणीतत्वे सति भर्त्तुरधिकस्नेहा । इति रसमञ्जरी ॥ * ॥ अलक्ष्मीः । यथा भगवतीं प्रति महादेववाक्यम् ।

"मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् ।
तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! ॥
ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससावृता ।
उत्पन्ना साब्रवीद्देवान् किं कर्त्तव्यं मयेति वै ॥
तामब्रुवंस्तदा देवीं सर्व्वे देवगणा भृशम् ।
येषां गृहान्तरे नित्यं कलहं संप्रवर्त्तते ॥
तत्ते स्थानं प्रयच्छामो वसस्तत्र शुभानने ! ।
यस्य गेहे कपालास्थिभस्मकेशादिचिह्नितम् ॥
परुषं भाषते नित्यं वदन्त्यनृतवादिनः ।
सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः ॥
तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु ॥
तत्र ते सततं स्थानं भविष्यति न संशयः ।
अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्म्मतिः ॥
तं भजस्व सदा देवि ! कलुषेणावृता भृशम् ।
तुषाङ्गारकपालास्थवालुकायसचर्म्मभिः ॥
दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः ।
रमस्व कलिना देवि ! तेषां वेश्मसु नित्यशः ॥
तिलपिष्टञ्च नक्तञ्च कालिङ्गशिग्रुगृञ्जनम् ।
छत्राकं विड्वराहञ्च विल्वकोषातकीफलम् ॥
अलाबुश्रीफलं ये वै खादयन्ति नराधमाः ।
तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा ॥
इत्यादिश्य सुराः सर्व्वे ते ज्येष्ठां कलिवल्लभाम् ।
पुनश्च मन्थनं चक्रुः क्षीराब्धिं सुसमाहिताः ॥"

इति पाद्मे उत्तरखण्डम् ॥

ज्येष्ठामूलीयः, पुं, (ज्येष्ठां मूलां वा नक्षत्रमर्हति पौर्णमास्यामिति छः ।) ज्यैष्ठमासः । इति त्रिकाण्डशेषः ॥ (यथा, शब्दार्थचिन्तामणिः ।
"ज्येष्ठामूलीयमिच्छन्ति मासमाषाढ़पूर्व्वजम् ॥")

ज्येष्ठाम्बु, क्ली, (ज्येष्ठं विविधरोगविनाशकत्वात् श्रेष्ठं अम्बु तण्डुलधौतं जलमिति । नित्यकर्म्मधारयः ।) तण्डुलाम्बु । इति वैद्यकपरिभाषा ॥ चेंड्डुनि जल इति भाषा ॥

ज्येष्ठाश्रमी, [न्] पुं, (आश्रमोऽस्त्यस्य इति । आश्रम + इनिः । ज्येष्ठः श्रेष्ठ आश्रमी ।)
"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः ॥"
"यथा वायुं समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः ।
तथा गार्हस्थ्यमाश्रित्य वर्त्तन्ते सर्व्व आश्रमाः ॥"
इति वचनाच्च गृहस्थाश्रमस्य सर्व्वाश्रमेषूत्कृष्टत्वात् तथात्वम् ।) गृहस्थः । इति हेमचन्द्रः ॥

ज्येष्ठी, स्त्री, गृहगोधा । जेठी इति टिकटिकी इति च भाषा । तत्पर्य्यायः । मुषली२ मुसली३ कुड्यमत्स्या ४ गृहगोधिका ५ [illegible]ी ६ टुकटुकी ७ शकुनज्ञा ८ गृहालिका ९ । इति शब्दरत्नावली ॥ तस्याः पतनफलं यथा,—

"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणहृदिस्था सर्व्वसौख्यं ददाति ॥"

इति ज्योतिषम् ॥

दिग्विशेषे तस्य शब्दफलम् ।

"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥
ज्येष्ठीरुते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः ॥"

इति तिथ्यादितत्त्वम् ॥

ज्यैष्ठः, पुं, (ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् ङीप् च । सा अस्मिन् मासे इति पुनरण् ।) मासविशेषः । ज्येष्ठानक्षत्रयुक्ता पौर्णमासी ज्यैष्ठी सा यत्र मासे भवति सः । वृषस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः । वृषराशिस्थरविकः सौरः । इति स्मृतिः ॥ तत्पर्य्यायः । शुक्रः २ । इत्यमरः ।१।४।१६॥ ज्येष्ठः ३ । इति शब्दरत्नावली ॥ तत्र जातस्य फलं यथा,—

"विदेशवृत्तिः पुरुषः सुतीव्रः
क्षमान्वितः स्यात् खलु दीर्घसूत्रः ।
विचित्रबुद्धिर्व्विदुषां वरिष्ठो
ज्यैष्ठाभिधाने जननं हि यस्य ॥"

इति कोष्ठीप्रदीपः ॥

ज्यैष्ठसामा, [न्] पुं, (ज्येष्ठसाम अधीते यः सः । इत्यण् ।) ज्येष्ठसामा । ज्येष्ठसामवेदाध्येता । इति मिताक्षरा ॥

ज्यैष्ठी, स्त्री, (ज्येष्ठानक्षत्रान्विता पौर्णमासीत्यण् ङीप् च ।) ज्यैष्ठपूर्णिमा । इति शब्दरत्नावली ॥ (यथा, तिथितत्त्वधृतभविष्यपुराणवचनम् ।
"कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ।
मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः ॥")
ज्येष्ठी च ॥

ज्यो, ङ नियमे । व्रतादेशे । उपनीतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं नियमार्थे-व्रतादेशादौ तु सकं-अनिट् ।) व्रतस्यादेशो व्रतादेशः । ङ, ज्यवते याज्ञिको नियमी स्यादित्यर्थः ।